**Bachelor of Science (B.Sc.) Semester—I (CBS) Examination**
**SANSKRIT**
**Compulsory Paper—2**

835

समय: — होरात्रयम्] [गुणाङ्का: —60

**सूचना :—** विशेषनिर्देशाभावे उत्तराणि स्वीकृतभाषया लिखत।

1. कथां लिखत —इन्द्रियकथा **अथवा** वदान्यश्रेष्ठ: भोज:। 12

2. पतिव्रतया मुने: गर्वहरणं कथं कृतम् ? नाहं बलाका इति पाठस्य आधारेण लिखत। 12

**अथवा**

श्रेष्ठिकृत सम्पत्ति विभाजनस्य तात्पर्यं शालिवाहनेन कथं स्पष्टीकृतम् ?

3. (अ) अनुवादं कुरुत :— 6

लव: — आर्य क एष चन्द्रकेतु: नाम ?
जनक: — जानासि रामलक्ष्मणौ दाशरथी ?
लव: — एतावेव रामायणकथा पुरुषौ ?
जनक: — अथ किम् ?
लव: — तत्कथं न जानामि।
जनक: — तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतु:।
लव: — उर्मिलाया: पुत्रस्तर्हि मैथिलस्य राजर्षे: दौहित्र:।

**अथवा**

प्रथमा — वत्स, एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।
बाल: — कुत्र ? देह्येतत्। (इति हस्तं प्रसारयति)
राजा — कथं चक्रवतिलक्षणमपि अनेन धार्यते।
द्वितीया — सुव्रते! न शक्यते एष वाचामात्रेण विरमयितुम्। गच्छ त्वम्। मदीय उटजे मार्कण्डेयस्य ॠषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति। तमस्योपहर।
प्रथमा — तथा (इति निष्क्रान्ता)
बाल: — अनेनैव तावत्क्रीडिष्यामि। (इति तापसीं विलोक्य हसति)

(ब) निम्नलिखित परिच्छेद पठित्वा उत्तराणि **संस्कृतभाषया** लिखत :— 6

अथ राज्यश्री: अपि नृत्यगीतादिषु कलासु प्रतिदिवसम् उपचीयमानपरिचया शनै: शनै: अवर्धत। परिमितै: एव दिवसै: यौवनं आरुरोह। निपेतु: एकस्यां तस्यां शरा: इव लक्ष्यभुवि भूभुजां सर्वेषां दृष्टय:। दूतप्रेषणादिभिश्च तां ययाचिरे राजान:।



rtmnuonline.com

कदाचित्तु राजा अन्त:पुरप्रासादस्थित: पार्श्वस्थितां महादेवीम् उत्सारितपरिजन: जगाद। "देवि" तरुणीभूता वत्सा राज्यश्री:।

(i) राज्यश्री: कासु कलासु परिचिता ?

(ii) राज्यश्री: कस्य कन्या ?

(iii) तस्यां केषां दृष्टय: निपेतु: ?

(iv) राजान: तां कथं ययाचिरे ?

(v) राजा महादेवी किं जगाद ?

(vi) अस्य पाठस्य नाम किम् ?

4. टिप्पणी**द्वयं** लिखत :— 12

(i) वाल्मीकि:

(ii) कालिदास

(iii) भास:

(iv) अश्वघोष:

5. (अ) **द्वयो:** ससन्दर्भ स्पष्टीकरणं लिखत :— 6

(i) आचार्य देवो भव।

(ii) पण्डितोऽपि वरं शत्रुर्न मूर्खो हितकारक:।

(iii) अनग्निसंशोधितेव हेमजातिर्नातिभाति बुद्धि:।

(iv) सर्वथा दुरन्त: खलु देवतानां प्रकोप:।

(ब) अनुरूपं योजयत :— 6

| **अ** | **ब** |
|---|---|
| इन्द्रिय-कथा | महाभारतम् |
| नाहं बलाका | भोजप्रबन्ध: |
| वदान्यश्रेष्ठ: भोज: | उपनिषद् |
| मालतीमाधवम् | भारवि: |
| पंचम वेद | भवभूति: |
| किरातार्जुनीयम् | व्यास: |



rtmnuonline.com